## अध्याय :- ३१ Chapter-31

नारद उवाच ।।[१]

ते चैनं यौज्य चाशीर्भिश्याचंत वरं गृहम् ।।
एष एव वरो|स्माकं यत्पापं तारकं जहि ।। १

एवमस्त्विति तानुक्त्वा योगोयोग इति ब्रूवन् ।।
तारकारिमहातेजा मयूरं चाध्यरोहत ।। २

शक्तिहस्तो विनद्याथ गुहो देवांस्तदा ब्रवीत् ।।
यद्यद्य तारकं नाहं हन्मि सुरोत्तमाः[२] ।। ३

गो ब्राह्मणावमन्तृणां ततो यामि गतिं स्फुटम् ।।
एवं तेन प्रतिज्ञाते शब्दो|ति सुमहान भूत ।। ४

योगोयोग इति प्राहुराज्ञया शरजन्मनः ।।
अरजो वाससी रक्ते वसानः पार्वतीसुतः ।। ५

~~अथाग्रे सर्वदेवानां भाति- व चरणायुधशोभितः ।।~~
अथाग्रे सर्वदेवानां स्थिरो वीरो ययौ मुदा ।।
तस्य केतुरलं भाति चरणायुधशोभितः ।। ६

चरणाभ्यां गिरीञ्छक्तो यो विदारयितुं रणे ।।
या चेष्टा सर्वभूतानां प्रभा शांतिर्बलं यथा ।। ७

---

१ ब. प्रतौ इत्ययं पाठः नास्ति ।
२ ब. सुरत्तमा

तन्मया गुहशक्ति: सा भृशं हस्ते व्यरोचत ।।
यदाढर्यं सर्वलोकेष्‍ु तन्मयं क्वचं तथा ।। ८

योत्स्यमानस्य वीरस्य देहेप्रादुरभूत्स्वयम् ।।
धर्मः सत्यमसंमोहरस्तेजः कांतत्वमक्षातिः ।। ९

बलमोजः कृपा चैव बद्धा करयुगं तथा ।।
आदेश कारीण्यग्र्यस्य स्वयं तस्थुर्महात्मनः ।। १०

तमग्रे चापि गच्छतं पृष्ठ तोनयुयौ हरः ।।
रथेना दिव्यवर्णेन पार्वत्या[1] सहितः प्रभुः ।। ११

निर्मितेन हरणैव[2] स्वयमीशेन लीलया ।।
सहस्त्रं तस्य सिंहानां तस्मिन्युक्तं रथोत्तमे ।। १२

अभीषून्पुरुषा व्याघ्र ब्रह्मा च जगृहे स्वयम् ।।
ते पिबंत इवाकाशं त्रासयंतश्चरा चरम् ।। १३

सिंहा रथस्य गच्छंतो नदंतश्चारु केसराः ।।
तस्मिन्रथे पशुपतिः स्थितो भात्युमया सह ।। १४

---

१ ब. पार्वत्य
२ ब. हारणैव

विद्युतामंडितः सूर्यः सैंद्रचापधनो यथा ।।
अग्रतस्तस्य भगवान्धनेशो गुह्यकैः सह ।। १५

आस्थाय रुचिरं याति पुष्पकं नरवाहनः ।।
ऐरावणं समास्थाय शक्रश्चापि[1] सुरैः सह ।। १६

पृष्ठतोनुययौ यांतं वरदं वृषभध्वजम् ।।
तस्य दक्षिणतो देवा मरुतश्चित्रयोधिनः ।। १७

गच्छंति वसुभिः सार्धं रुद्रैश्च सह संगताः[2] ।।
यमश्च मृत्युना सार्धं सर्वतः परिवारितः ।। १८

घोरैस्त्र्याधिशतैश्चापि सव्यतो याति कौपितः[3] ।।
यमस्य पृष्ठतश्चापि घोरस्त्रिशिखरः सितः ।। १९

विजयोनाम रुद्रस्य याति शूलः स्वयंकृतः ।।
तमुग्रपाशो भगवान्वरुणः सलिलेश्वरः ।। २०

परिवार्य शनैर्याति यादोभिर्विविधैर्वृतः ।।
पृष्ठतो विजयस्यापि याति रुद्रस्य पट्टिशः ।। २१

---

१ ब. शक्रः श्चापि
२ ब. ता
३ ब. कौपतः

गदामुशल शक्तयाद्यैर्वर प्रहरणैर्वृतः ।।
पट्टिशं चान्वगात्पार्थ अस्त्रं पाशुपतं महत् ।। २२

बहुशीर्षं महाघोरमेकपादं बहूदरम् ।।
कमंडलुश्चास्य पश्चान्महर्षिगण सेवितः ।। २३

तस्य दक्षिणतो भाति दण्डो गच्छंछ्रियावृतः ।।
भृगुवंगिरोभिः सहितो दैवैरप्यभि पूजितः ।। २४

राक्षसाश्चान्य देवाश्च गन्धर्वा भुजगास्तथा ।।
नद्यो नदाः समुद्राश्च मुनयो (प्सरसां गणाः[1] ।। २५

नक्षत्राणि ग्रहाश्चैव जंगमं स्थावरं तथा ।।
मातरश्च महादेवमनुजग्मुः क्षुधान्विताः ।। २६

सवेषां पृष्ठतश्चासीत्तार्क्ष्यस्थो बुद्धिमान्हरिः ।।
पालयन्पृतनां सर्वां स्वपरीवार संवृतः ।। २७

एवं सैन्यसमोपेत उत्तरं तटमागतः ।।
ताम्रप्राकारमाश्रित्य तस्थौ त्र्यंबक नंदनः ।। २८

---

१ ब. गण

स तारकपुरस्यापि पश्यनृद्धि मनुत्तमाम् ।।
विसिष्मिये महासेनः प्रशशंस तपो ऽस्य च ।। २९

स्थितः पश्यन्स शुशुभे मयूरस्थो गृहस्तदा ।।
छत्रेण ध्रियमाणेन स्वयं सोम समस्त्विषा ।। ३०

वीज्यमानश्च चामराभ्यां वाटवगुनिभ्यां महाद्युतिः ।।
मातृभिश्च सुरैर्दत्तैः स्वैर्गणैरपि संवृतः ।। ३१

ततः प्रणम्य तं शक्रो देव मध्ये वचो ऽब्रवीत् ।।
पश्य पश्य महासेन दैत्यानां बलशालिनाम् ।। ३२

ये त्वां कालं न जानंति मर्त्या गृहरता[2] इव ।।
एतेषां च गृहे दूतो यस्त्वां शंसतु[3] तारकम्[4] ।। ३३

वीराणामुचितं त्वेतत्कीर्तिदं च महाजने ।।
अनुज्ञया ततः स्कन्दभक्तं च शक्रोधर्नंजय ।। ३४

मामादिश्यासुरेन्द्राय प्राहिणोदौत्य योग्य कम् ।।
अहं स्वयं गन्तुकामः शक्रेणापि च प्रेषितः ।। ३५

---

१ व. पिरस्यापि
२ ब. गेहरता
३ ब. शंसित
४ ब. तारकः

प्रासादे स्त्री सहस्त्राणां प्रावोचं मध्यतो ऽप्यहम् ।।
असुराधमदुर्बुद्धे शक्रस्त्वामाह तच्छृणु ।। ३६

यज्जगद्दलनादाप्तं किल्बिषं दानव त्वया ।।
तस्याहं नाशकस्ते ऽद्य पुरुषाश्चेद्भविष्यसि चेन्न हि ।। ३७

शीघ्रं निःसर पापिष्ठ निःसरिष्यसि चेन्न हि ।।
क्षणात्तव पुरं क्षेप्स्ये पाविन्नयायैव सागरे ।। ३८

इति श्रुत्वा[1] रुक्षवाचं क्रुद्धः स्त्रीगण संवृतः ।।
मुष्टिमुद्यम्यमा ऽ धावद्भीतश्चाहं पलायितः ।। ३९

व्याकुलस्तत्र वृतांतं कुमाराय न्यवेदयम् ।।
मयि चाप्यागते दैत्यश्चिंतयामास चेतसि ।। ४०

नालब्धः[2] संश्रयः[3] शक्रो वक्तुमेतदिहार्हति ।।
निमित्तानि च घोराणि संत्रासं जनयंति मे ।। ४१

एवं विचिंत्य चोत्थाय गवाक्षं स्सोध्यरोहत ।।
सहस्त्र भौमिकावास श्रृङ्ग वातायन स्थितः ।। ४२

---

१ ब. श्रुत्व
२ ब. नालबधः
३ औ. संश्रयः

अपश्यदेवसैन्यं स दिवं भूमिं च संवृतम् ।।
रथैर्गजैर्हयैश्चापि नादिताश्च दिशो दश ।। ४३

*१ विमानैश्चाद्भुताकारैः किंनरोद्गीत नादितैः ।।
दुन्दुभिभिर्गोविषाणै स्तालैः शंखैश्च नादितैः ।। ४४

अक्षोभ्यामिव तां सेनां दृष्ट्वा सोऽचिंतयत्तदा ।।
एते मया जिताः पूर्वं कस्माद्भूयः समागताः ।। ४५

इति चिंतापरो दैत्यः शुश्राव कटुकाक्षरम् ।।
देवबंदिभिरुद्घुष्टं घोरं त्ददयदारणम् ।। ४६

कुमारनाथ जय दितिकुल महोदधि वडवानल ।।
महासेन तारकवंश शुष्क तृणदावानल विराजित चरणकमल स्कन्द
जय बालसप्तवासर भुवनावलि शोकसंदहन ।। ४७

नमोऽनमस्तेस्तु मनोरमाय नमोस्तु ते साधुभयापहाय ।।
नमोस्तु ते बालकृता २चलाय नमो नमो नाशय देवशत्रून ।। ४८

*३ इति श्री स्कांदे महापुराण.......कुमारस्य तारकासुर नगरं प्रति गमनवर्णनं
–नामैकत्रिंशोऽध्यायः ।।

---

*१ विमानै....... तैः । ब. प्रतौ श्लोकः नास्ति ।
२ *. ..... वराय
*३ ब. इति श्री स्कंद पुराणे कुमारिककखंडे एकत्रिंशोध्यायः ।।